शल्याङ्गम्। अजषण्डे, स्त्री। इति मेदिनी। के, ११० ॥ (न अलीकमिति। सत्यम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४२।
"नालीकाश्रयमेतदत्र वचनं बाणाश्रयं किं वचः ॥")

नालीकिनी, स्त्री, (नालीकमस्त्यस्या इति। नालीक+इनिः। ङीप्।) पद्मसमूहः। इति शब्दरत्नावली ॥

नालीव्रणः, पुं, (नालीगतो व्रणः।) नाड़ीव्रणः। इति शब्दरत्नावली ॥

नाविकः, पुं, (नावा तरतीति। नौ+"नौद्व्यच-ष्ठन्।" ४। ४। ७। इति ठन्। नौरस्त्यस्येति। "व्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन् वा।) कर्णधारः। इत्यमरः। १। १०। १२ ॥ (यथा, महाभारते। ८। ७७। ७५।
"भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृताः।
भजन्ति पुरुषव्याघ्र! नाविकाः कालपर्य्यये ॥")

नाव्यं, त्रि, (नावा तार्य्यम्। नौ+"नौवयो-धर्म्मेति।" ४। ४। ९१। इति यत्।) नौका-गम्यदेशादि। इत्यमरः। १। १०। १० ॥ (यथा, रघुः। ४। ३१।
"मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥")
नवस्य भावः। नव+ष्यञ्।) नवत्वञ्च ॥

नाशः, पुं, (नश+भावे घञ्।) पलायनम्। निधनम्। (यथा, महाभारते। १। १२०। १६।
"पितृशादृणादनिर्मुक्तस्तेन तप्ये तपोधनाः।
देहनाशे ध्रुवो नाशः पितॄणामेष निश्चयः ॥")
अनुपलम्भः। अदर्शनम्। इति मेदिनी। शे, ६ ॥ परिध्वस्तिः। इति हेमचन्द्रः। २। २३८ ॥
जीवानां नाशहेतुर्यथा,—
"सङ्गात् संजायते कामः कामात् क्रोधोऽभि-जायते।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥"
इति श्रीभगवद्गीता ॥
कुलनाशकारणं यथा,—
"अनृतात् पारदार्य्याच्च तथाभक्ष्यस्य भक्षणात्।
अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् ॥
अश्रोत्रिये वेददानात् वृषलेषु तथैव च।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
नश्यतां पूर्व्वरूपाणि यथा,—
अत्रिरुवाच।
"नश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे।
नगराणां तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि ॥
गर्ग उवाच।
पुरुषाचारनियमात् परित्यजति देवता।
ततोऽपरागाद्देवानामुपसर्गः प्रवर्त्तते ॥
दिव्यान्तरीक्षे भौमश्च त्रिविधं परिकीर्त्तितम्।
यहर्क्षवैकृतं दिव्यमन्तरीक्षं निबोध मे ॥
उल्कापातो दिशां दाहः परिवेशस्तथैव च।
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता च या।
एवमादीनि लोकेऽस्मिन् नाकेशानां विनिर्द्दिशेत् ॥
चरः स्थिरस्तु भूमौ च भूकम्पश्चापि भूमिजः।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम् ॥"
इति मात्स्ये २०३ अध्यायः ॥

नाशी, [न्] त्रि, (नाशोऽस्त्यस्येति। नाश+इनिः।) नाशविशिष्टः। नाशशब्दादस्त्यर्थे इन्प्रत्ययनिष्पन्नः ॥

नासत्यौ, पुं, (नास्ति असत्यं ययोस्तौ। "नभ्राण्-नपादिति।" ६। ३। ७५। इति नञः प्रकृति-भावः।) अश्विनीकुमारौ। नित्यद्विवचनान्तो-ऽयम्। इत्यमरः। १।१।५४ ॥ एतौ शूद्रौ। यथा,
"आदित्याः क्षत्त्रियास्तेषां विशश्च मरुतस्तथा।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥
स्मृतास्त्वाङ्गिरसा देवा ब्राह्मणा इति निश्चयः॥"
इति महाभारते मोक्षधर्म्मः ॥
("सन्दृश्य दस्रयोरिन्द्रः कर्म्माण्येतानि बलवान्।
आयुर्व्वेदं निरुद्वेगं तौ ययाचे शचीपतिः ॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ।
आयुर्व्वेदं यथाधीतं ददतुः शतमन्यवे ॥
नासत्याभ्यामधीत्यैष आयुर्व्वेदं शतक्रतुः।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नासा, स्त्री, (नासते शब्दायते इति। नास शब्दे +"गुरोश्च हलः।" ३। ३। १०३। इति अः। ततष्टाप्। नास्यतेऽनयेति। नास+करणे घञ् वा।) नासिका। नाक् इति भाषा। सा च गर्भस्थबालकस्य पञ्चभिर्मासैर्भवति। इति सुखबोधः ॥ तस्याः शुभाशुभलक्षणं यथा,—
"शुकनासः सुखी स्याच्च शुष्कनासेऽतिजीवनम्।
छिन्नाग्ररूपनासः स्यादगम्यागमने रतः ॥
दीर्घनासे च सौभाग्यं चौर आकुञ्चितेन्द्रियः।
स्त्रीमृत्युश्चिपिटनास ऋजुर्भाग्यवतां भवेत् ॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे।
क्रूरे दक्षिणवक्रा स्याद्धनिनाञ्च च्युतं सकृत् ॥"
इति गरुड़पुराणम् ॥
द्वारोपरिस्थितदारु। भ्याम् काठ इति कपालि इति च भाषा। इत्यमरः। २। २।१३॥ वासक-वृक्षः। इति राजनिर्घण्टः ॥

नासाच्छिन्नी, स्त्री, (छिद+भावे क्तः। नासायां छिन्नं छेदो यस्याः। ङीष्।) पूर्णिकापक्षी। इति त्रिकाण्डशेषः ॥

नासादारु, क्ली, (नासायै यद्दारु। नासेव दारु इति वा।) द्वारोर्द्ध्वस्थितकाष्ठम्। इत्यमर-टीकायां स्वामी ॥ कपालि इति भाषा ॥

नासारोगः, पुं, (नासाया रोगः।) नासिका-व्याधिः। "अथ नासारोगाधिकारः। तत्र नासा-रोगाणां नामानि संख्याश्चाह।
आद्यौ च पीनसः प्रोक्तः पूतिनस्यस्ततः परम्।
नासापाकोऽत्र गणितः पूयशोणितमेव च ॥
क्षवथुर्भ्रंशथुर्दीप्तिः प्रतीनाहः परिस्रवः।
नासाशोषः प्रतिश्यायाः पञ्च सप्तार्व्वुदानि च ॥
चत्वार्य्यर्शांसि चत्वारः शोथाश्चत्वारितानि च।
रक्तपित्तानि नासायां चतुस्त्रिंशद्गदाः स्मृताः ॥
तेषु पीनसस्य लक्षणमाह।
आनह्यते शुष्यति यस्य नासा
प्रक्लेदमायाति च धूप्यते च।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येदिह पीनसेन ॥
आनह्यते श्वासशोषितकफेनावध्यते अवरुद्धत इति यावत्। प्रक्लेदं आर्द्रताम्। धूप्यते सन्ता-प्यते। गन्धरसान् गन्धान् सुरभीनसुरभींश्च न वेत्ति। नासाया आनद्धत्वं तत्र हेतुः। तथा रसान् मधुरादींश्च न वेत्ति। नासारोगा-रम्भकदोषेण रसनाया अपि दुष्टेः। व्यवस्येत् जानीयात्। अपीनसपीनसौ द्वावपि शब्दौ स्तः ॥ * ॥ अनुक्तसंग्रहार्थमाह।
तच्चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम्।
तं विकारं पीनसं प्रतिश्यायसमानलिङ्गं वात-श्लेष्मकप्रतिश्यायतुल्यलक्षणम् ॥
पूतिनस्यमाह।
दोषैर्व्विदग्धैर्गलतालुमूले
सन्दूषितो यस्य समीरणस्तु।
निरेति पूतिर्म्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम् ॥
दोषैः पित्तकफरक्तैः। अत्र रक्तस्यापि दोषत्वं दोषसाहचर्य्यात्। विदग्धैर्दुष्टैः। संदूषितः पूतिभावं नीतः। पूतिनस्यं नासायां भवो नस्यो वायुः पूतिर्नस्यो यत्र स पूतिनस्यस्तम् ॥ * ॥
नासापाकमाह।
घ्राणाश्रितं पित्तमरूंषि कुर्य्यात्
यस्मिन् विकारे बलवांश्च पाकः।
तं नासिकापाकमिति व्यवस्येत्
विक्लेदकोथावथवापि यत्र ॥
विक्लेद आर्द्रता। कोथः पूतिभावः ॥ * ॥
पूयरक्तमाह।
दोषैर्व्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥
क्षवथुमाह।
घ्राणाश्रिते मर्म्मणि संप्रदुष्टो
यस्यानिलो नासिकया निरेति
कफानुजातो बहुशोऽतिशब्द-
स्तं रोगमाहुः क्षवथुं गदज्ञाः ॥
घ्राणाश्रिते मर्म्मणि शृङ्गाटके ॥ * ॥
दोषजं क्षवथुमभिधायागन्तुजं क्षवथुमाह।
तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्व्वा तरुणास्थिमर्म्म-
ण्युद्धट्टितेऽन्यः क्षवथुर्निरेति ॥
तीक्ष्णोपयोगात् राजिकादिभक्षणात्। अर्क-निरीक्षणात् सूर्य्यदर्शनात् तेन कफविलेपनात्।